# टिळक महाराष्ट्र विद्यापीठ, पुणे

**23E/22E**

**संस्कृत विशारद (बी.ए.) – बहि:स्थ**

**परीक्षा : मे – २०२५**

**सत्र ४ थे**

**विषयः ऐतिहासिक काव्ये (23E444/22E444)**

**दिनांक :२४/०५/२०२५** **गुण : १००** **वेळ : स. १०.०० ते दु. १.००**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १. अ) द्वयोः अनुवादं कुरुत।** **(२०)**

१) देवस्तु हर्षस्तं प्रत्यवादीत्– करणीयमेवेदमभिहितं मान्येन! इतरथा हि मे गृहीतभुवि भोगिनाथेऽपि दायाददृष्टिरीर्ष्यालोर्भुजस्य । उपरि गच्छतीच्छति निग्रहाय ग्रहणेऽपि भ्रूलता चलितुम्। अनमत्सु शैलेष्वपि कचेग्रहमभिलषति दातुं करः। तेजोदुर्विदग्धानर्ककरानपि चामराणि ग्राहयितुमीहते हृदयम्। राजशब्दरूपाणां मृगराजानामपि शिरांसि वाञ्छति पादः पादपीठीकर्तुम्।

२) अरणिरमर्षाग्नेः, ऐश्वर्यं शौर्यस्य, मदो मदस्य, विसर्पो दर्पस्य, हृदयं हठस्य, जीवितं जिगीषुतायाः, समुच्छ्वसितमुत्साहस्य, अङ्कुशो दुर्मदानां, नागदमनो दुष्टभोगिनां, विरामो वरमनुष्यतायाः कुलगुरुर्वीरगोष्ठीनां, तुला शौर्यशालिनां, सीमान्तदृश्वा शस्त्रग्रामस्य, संनिधावेव समुपविष्टः सिंहनादनामा स्वरेणैव दुन्दुभिघोषगम्भीरेण सुभटानां समररसमानयनन्विज्ञापितवान्।

३) अथ तथागते भ्रातरि, उपरते च पितरि, प्रोषितजीवितेच जामातरि, मृतायां च मातरि, संयतायां च स्वसरि, स्वयूथभ्रष्ट इव वन्यः करी देवो हर्षः कथं कथमप्येकाकी कालं तमनैषीत्। अतिक्रान्तेषु बहुषु वासरेषु कदाचित्तयैव भ्रातृगमनदुःखासिकया दत्तप्रजागरस्त्रिभागमेषायां त्रियामायां यामिकेन गीयमानामिमामार्यां शुश्राव द्वीपोपगीतगुठामपि समुपार्जितरत्नराशिसारमपि। पोतं पवन इव विधिः पुरुषमकाण्डेनिपातयति।।

**आ) द्वयोः अनुवादं कुरुत।** **(१०)**

१) उत्साहप्रभुमन्त्रशक्तिसहिते यस्मिन्समस्ता दिशो जित्वा भूमिपतीन्विसृज्य महितानाराध्य देवद्विजान् ।
वातापीं नगरीं प्रविश्य नगरीमेकामिवोर्वीमिमां चञ्चन्नीरधिनीलनीरपरिखां सत्याश्रये शासति ।।

२) नानाहेतिशताभिघातपतितभ्रान्ताश्वपत्तिद्विपे नृत्यद्भीमकबन्धखड्गकिरणज्वालासहस्रे रणे ।
लक्ष्मीर्भावितचापला च कृता शौर्येण येनात्मसाद् राजासीज्जयसिंहवल्लभ इति ख्यातश्चलुक्यान्वयः ।।

३) अपरिमितविभूतिस्फीतसामन्तसेनामुकुटमणिमयूखाक्रान्तपादारविन्दः ।
युधि पतितगजेन्द्रानीकबीभत्सभूतो भयविगळितहर्षो येन चाकारि हर्षः ।।

**प्र. २. अ) त्रयाणां वाक्यानां स्पष्टीकरण ससन्दर्भं लिखत ।** **(१५)**

१) श्रूयतां मे प्रतिज्ञा । २) त्यज्यतां सर्वविश्वासिता । ३) प्रतापसहाया हि सत्त्ववन्तः ।
४) मनसा प्रथमतरं गतस्तपोवनमधोमुखस्तूष्णीमवातिष्ठत । ५) परां भीषणतामयासीत् ।

**आ) वाक्यद्वयस्य स्पष्टीकरण ससन्दर्भं लिखत ।** **(१०)**

१) प्रापितावभृथमज्जना बभौ । २) दण्डोपनतसामन्तचर्याचार्या इवाभवन् ।
३) प्राकारान्तरितप्रतापमकरोद्यः पल्लवानां पतिम् ।

**प्र. ३. अ) तिस्रः टिप्पणीः लिखत ।** **(१५)**

१) अशौचदिवसाः २) सिंहनादस्य भाषणम् ३) स्कन्दगुप्तस्य राजकुलप्रवेशः
४) राज्यवर्धनस्य विरक्तिविचारात् श्रुत्वा हर्षस्य चिन्तनम्

**आ) टिप्पणीद्वयं लिखत–** १) गन्धगजः २) षड्विधं बलम् ३) रविकीर्तिः **(१०)**

**प्र. ४. अ) एकं सविस्तरमुत्तरत ।** **(१०)**

१) हर्षस्य प्रतिज्ञां तथा युद्धोपक्रमं श्रुत्वा शत्रुराज्ये कानि उपलिङ्गानि उत्पन्नानि?

२) हर्षचरितकाव्यस्य वैशिष्ट्यानि विशदीकुरुत ।

**आ) एकं सविस्तरमुत्तरत ।** **(१०)**

१) द्वितीयपुलकेशिनः ऐहोळेप्रशस्तिलेखस्याशयं विशदयत ।

२) पुराभिलेखानामुद्दिष्टं तथा ऐतिहासिकं महत्त्वं स्पष्टीकुरुत ।

----------